**CMY : 10/3/2008** **Code No. 1060**

*रोल नं०* | | | | | | | | | | | **SET : A**

Deleted: *SERIES*

Formatted

# संस्कृत

***ACADEMIC/OPEN***

**SEMESTER – II (Subjective Type)**

***Morning Session***

(Only for Fresh & Re-appear Candidates)

*समय : $2\frac{1}{2}$ घंटे ]* *[ पूर्णांक : 90*

---

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

---

*सामान्य निर्देश :*

(i) *इस प्रश्न-पत्र के **चार** खण्ड हैं* – क, ख, ग *और* घ।

(ii) ***चारों खण्डों के प्रश्नों के उत्तर देना अनिवार्य है।***

*(iii) प्रत्येक खण्ड के प्रश्नों के उत्तर क्रमानुसार दीजिए।*

## खण्ड – क

### (अपठितांशावबोधनम्)

**1.** अधोलिखितं अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत – $1 \times 10 = 10$

प्रकृतिः मनुष्यस्य उपकारिणी। मनुष्यैः सह तस्याः शाश्वतः सम्बन्धः। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति। विविधाः ओषधयः सकलानि खनिजानि च प्रकृतेः एव शोभा। सा तु नित्यम् एव एतैः साधनैः सर्वेषाम् उपकारं करोति, परम् अधन्यः अयं जनः कृतज्ञतां विहाय असाधुसेवितं पथं गच्छति, विविधानि कष्टानि च अनुभवति। नरः शाश्वतं सुखं वाञ्छति चेत् तर्हि प्रकृतेः प्रतिकूलं कदापि न आचरेत्।

(i) मनुष्यैः सह कस्याः शाश्वतः सम्बन्धः ?

(ii) प्रकृतिः विविधरूपेषु कुत्र आत्मानं प्रकटयति ?

(iii) प्रकृतेः का शोभा अस्ति ?

(iv) प्रकृतिः कस्य उपकारिणी अस्ति ?

(v) अधन्यः अयं जनः कृतज्ञतां विहाय किम् करोति ?

(vi) नरः शाश्वतं सुखं वाञ्छति चेत् तर्हि किम् कदापि न आचरेत् ?

(vii) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(viii) 'अनुभवति' इति पदे कः लकारः वर्तते ?

(ix) 'अस्मिन्' पदस्य परिचयः दीयताम्।

(x) 'कदापि' पदस्य सन्धिविच्छेदं कुरुत।

## खण्ड – ख

### (रचनात्मकं कार्यम्)

**2.** (क) मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं संवादं पूरयत – $1 \times 5 = 5$

**शाकविक्रेत्री** – स्वीकरोतु। स्वास्थ्यवर्धकानि (i) ____________ गृञ्जानि। एतानि पित्तं (ii) ____________। रक्तं वर्धयन्ति च।

**सुरभि** – अयि (iii) ____________ किं चिकित्सिका असि ?

**शाकविक्रेत्री** – मया तु गुणाः अपि (iv) ____________। अहं प्राकृतिकचिकित्सकस्य (v) ____________ अस्मि।

**मञ्जूषा**

| |
|---|
| पुत्री, त्वम्, वर्णनीयाः रक्तवर्णानि, शमयन्ति। |

(ख) चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन *पञ्चवाक्यानि* लिखत – $1 \times 5 = 5$



**मञ्जूषा**

| |
|---|
| मेघाच्छन्नम्, वर्षाऋतोः, आतपत्रम्, कर्गदनौकाः, दर्दुरः। |

## खण्ड – ग
## (अनुप्रयुक्तम् व्याकरणम्)

**3.** (क) गुणसन्धेः ***अथवा*** यणसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $3 \times 1 = 3$

(ख) अधोलिखितेषु ***त्रिषु*** एव सन्धिं सन्धिविच्छेदं वा कृत्वा सन्धिनाम अपि लिखत – $1 \times 3 = 3$

चन्द्रोदयः, सत् + आचारः, शिशुर्हसति, पावकः, वने + अस्मिन्।

**4.** (क) अव्ययीभाव ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं लिखत। $3 \times 1 = 3$

(ख) अधोलिखितेषु ***त्रिषु*** एव समासं विग्रहं वा कृत्वा समासस्य नाम अपि लिखत – $1 \times 3 = 3$

कूपं पतितम्, वृक्षमूले, नीलं गगनम्, मातापितरौ, पीतानि अम्बराणि यस्य सः।

**5.** कोष्ठकनिर्दिष्टानां प्रकृतिप्रत्ययानाम् योगेन निर्मितैः उचितपदैः रिक्तस्थानानि पूरयत – $1 \times 5 = 5$

(i) समाचारपत्रं कुत्र __________ ।(पठ् + अनीयर्)

(ii) __________ बालकः लिखति। (पठ् + शतृ)

(iii) __________ जनः यशः प्राप्नोति। (गुण + मतुप्)।

(iv) कर्मशीलः __________ कथ्यते। (योग + इन्)

(v) मनुष्यः __________ प्राणी अस्ति। (समाज् + ठक्)

**6.** अव्ययपदैः वाक्यनिर्माणं कुरुत – $1 \times 5 = 5$

अत्र, शनैः शनैः, विना, मा, उपरि।

**7.** केषांचित् ***त्रयाणाम्*** वाच्यपरिवर्तनं कुरुत – 1 × 3 = 3

(i) दिनेशः जनकं प्रणमति।

(ii) महिलाः जलम् आनयन्ति।

(iii) शिष्याः गुरुन् नमन्ति।

(iv) पथिकः नगरं गच्छति।

(v) सः सुखं अनुभवति।

## खण्ड – घ

## (पठितावबोधनम्)

**8.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानां उत्तराणि लिखत –

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा बभूव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म।

I. पूर्णवाक्येन उत्तरत – 1 × 2 = 2

(i) बोधिसत्त्वः कैः शिवीनां राजा बभूव ?

(ii) बोधिसत्त्वः बाल्यात् एव कीदृशः आसीत् ?

II. पूर्णवाक्येन उत्तरत – 2 × 1 = 2

(i) जनकल्याणकर्मसु रतः बोधिसत्त्वः किम करोति स्मः ?

III. यथानिर्देशं उत्तरत – 1 × 1 = 1

(i) 'पालयति' पदस्य परिचयः दीयताम्।

**9.** अधोलिखितं पद्यं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।

I. पूर्णवाक्येन उत्तरत – 1 × 2 = 2

(i) विदुषां किम् वचः ?

(ii) प्राणेभ्योऽपि किम् रक्षेत् ?

II. पूर्णवाक्येन उत्तरत – 2 × 1 = 2

(i) एषः पद्यः कस्मात् पाठात् उद्धृतः ?

III. यथानिर्देशं उत्तरत – 1 × 1 = 1

(i) 'इत्येतद्' पदस्य सन्धिविच्छेदं लिखत।

**10.** अधोलिखितं नाट्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

**द्रौपदी** – (दीर्घं निःश्वस्य) हा हन्त। किम् इदं घोरं आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः।

**युधिष्ठिरः** – शुभे ! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुं न अर्हसि।

I. पूर्णवाक्येन उत्तरत – 1 × 2 = 2

(i) द्रौपद्याः पुत्राः केन हताः ?

(ii) द्रौपद्याः शोकः कथम् दहति ?

II. पूर्णवाक्येन उत्तरत – 2 × 1 = 2

(i) वीरजननी द्रौपदी किम् कर्तुं न अर्हसि ?

III. यथानिर्देशं उत्तरत – 1 × 1 = 1

(i) संवादे कति पात्राणि सन्ति ?

**11.** अधोलिखितस्य गद्यांशस्य हिन्दीभाषायां सप्रसंग व्याख्यां कुरु – 5 × 1 = 5

मम कलनस्य तु आधारः सूर्य एव। सूर्यस्य द्वे गती उत्तरायणम् दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मासाः। भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति। यथा चैत्र मासे पूर्णिमा चित्रा नक्षत्रयुता भवति, अतः तस्य मासस्य नाम 'चैत्रः' भवति।

**12.** अधोलिखितपद्यस्य हिन्दीभाषायां सप्रसंग व्याख्यां कुरु – 5 × 1 = 5

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

**13.** अधोलिखितस्य नाट्यांशस्य हिन्दीभाषायां सप्रसंग व्याख्यां कुरु – 5 × 1 = 5

**राजहंसः** – शान्तं शान्तम्। अहमेव नीरक्षीरविवेकी पक्षिणाम् राजा !

**बकः** – धिक् युष्मान्। अहमेव सर्वशिरोमणिः !

(ततः प्रकृतिमाता प्रविशति)

**प्रकृतिः** – (सस्नेहम्) अलम् अलं मिथः कलहेन। अहम् प्रकृतिः एव युष्माकं जननी। यूयं सर्वे एव मम प्रियाः। सर्वेषामेव महत्त्वं विद्यते यथासमयम्। सर्वैः एव मे शोभा। न तावत - कलहेन समयं वृथा यापयेत। मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्।

**14.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – 2 × 3 = 6

(i) तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।

(ii) कस्यवशे प्राणिगणः ? सत्यप्रिय भाषिणो विनीतस्य।

(iii) पापिनाञ्च सदा दुखं, सुखं वै पुण्यकर्मणाम्।

**15.** अधोलिखितानि वाक्यानि पठित्वा रेखाङ्कितं पदं आश्रित्य प्रश्ननिर्माणं कुरुत –
1 × 4 = 4

(i) राजा <u>नगरस्य</u> समन्ततः दानशालाः अकारयत्।

(ii) अभीष्टवस्तूनि प्राप्य <u>याचकाः</u> तुष्टाः आसन्।

(iii) <u>दानशालासु</u> विचरन् राजा अचिन्तयत्।

(iv) राजा <u>याचकेभ्यः</u> दानम् ददाति स्म।

**16.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत – $\frac{1}{2} \times 10 = 5$

(i) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत्।

(ii) तेन तम् आशु ताडयन्ति स्म।

(iii) एतेषाम् कलहो न वानराणां हिताय।

(iv) सूपकाराणाम् मेषेण सह एषः कलहं नूनं भवतां विनाशकारणं भविष्यति।

(v) कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म।

(vi) ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति।

(vii) तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म।

(viii) एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत् –

(ix) तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्।

(x) तेषां मेषाणाम् मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति।

**p**



27,000